गमात् विवर्जितं, प्राज्याढ्यं चाज्यबहुलमन्नम्। "दक्षिणाढ्यं हरम्यावेद्दामोदरन्तु हरिं विभुम्"। इत्यादि "अष्टम्यां पितरावर्च्य विधिनानेन सुव्रत!"। पितरौ तावेव देवीदेवौ "वत्सरान्तु तदन्ते तु कर्त्तव्यं यन्निबोधत। प्रागुक्तविधिना पूज्य सितं पीतं युगद्वयम्। दद्याद्वितानकं चैव पताकाघण्टिके तथा। धूपस्यादरणे चापि दीपस्थौ सुशोभिनौ"। भविष्यपु॰ "ताम्रपात्रं पयःपूर्णं कृत्वा तत्रस्य शङ्करम्। प्रच्छाद्योपरिवस्त्रेण गन्धपुष्पार्चितं महत्। शिवभक्ते द्विजे दद्याद्भोजयित्वा विधानतः। प्राच्यां समुदिते सोमे प्रतीच्याञ्च रवौ गते। पौर्णमास्यां तु वैशाख्यां ग्टहपात्रं शिवाय तु। प्रीयतां मे महादेवः सोममूर्त्तिर्जगत्पतिः। तस्मै विप्राय तत्पात्रमर्चयेद्भक्तितः शनैः। एवं सोमव्रतं नाम कृत्वा सोमान्तिकं व्रजेत्"।

सोमवारव्रतं भविष्योत्तरे "तद्वच्चित्रान्तु संप्राप्य सोमवारं विचक्षणः। नक्तोक्तविधिना सर्वं कुर्य्यात् पूजादिकं विभोः। सप्तमे तु ततः प्राप्ते दत्त्वा ब्राह्मणभोजनम्। कांस्यपात्रे तु संस्थाप्य सोमं रजतसम्भवम्"। सोमरूपन्तु चतुर्दशीस्थमहाराजव्रतोक्तं वेदितव्यम् "पात्रे कृत्वा सोमराजं श्वेतवस्त्रैः सपूजितम्। पादुकोपानहच्छत्रभाजनासनसंयुतम्। होमं घृततिलैः कुर्य्यात् सोमनाम्ना तु मन्त्रवित्। समिधोऽष्टोत्तरशतमष्टाविंशतिरेव वा। होतव्या मधुसर्पिभ्यां दध्ना चैव घृतेन तु" इत्यादि।

सोमाष्टमीव्रतं स्कान्दपु॰ "वारे सोमस्य चाष्टम्यां पक्षयोरुभयोरपि। विधिवच्चन्द्रचूडाभं सोमं सम्पूजयेन्निशि"। सोमं उमासहितम् रूपन्तु कृष्णाष्टम्यामेव व्याख्यातम्। "तिलसर्षपकल्केन स्नातोऽमलजलाशये। ग्टहे वायतने वापि शिवैकाहितमानसः। ब्रह्मकूर्चेन देवेशं प्राशयित्वा ततो व्रती"। ब्रह्मकूर्चं पञ्चगव्यम् "वामादियाममन्त्रैश्च देवं देवीं तथार्च्चयेत्। चन्दनेनेन्दुयुक्तेन दक्षिणाङ्गं विलेपयेत्" इत्यादि।

सौख्यव्रतं भविष्यपु॰ "एकादश्यां माघमासे चतुर्दश्यष्टमीषु च। एकभक्तेन यो दद्यात् चेलकान्यर्जुनानि च। उपानहौ कम्बलञ्च पात्रं चित्रं तथोदकम्। करपात्रादिकं वत्स! यथाशक्त्यार्थिने नृप!। आर्त्तत्राणपरो नित्यमश्वमेधफलं लभेत्। एतत्सौख्यव्रतं नाम आर्त्तत्राणकरं परम्"।

सौगन्ध्यव्रतं पद्मपु॰ "वर्जयेद्यस्तु पुष्पाणि हेमन्तशिशिरे व्रती। पर्वत्रयञ्च फाल्गुन्यां कृत्वा शक्त्या च काञ्चनम्। दद्याद्वैकालवेलायां प्रीयेतां शिवकेशवौ। शिरःसौगन्ध्यजननं सदानन्दप्रदं नृणाम्। कृत्वा परं पदं याति सौगन्ध्यव्रतमुत्तमम्"।

सौभाग्यतृतीयाव्रतं वराहपु॰ "अतःपरं महाराज! सौभाग्यकरणं व्रतम्। शृणु येनाशु सौभाग्यं स्त्रीपुंसामभिजायते। फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षतः। उपोषितेन नक्तेन शुचिना सत्यभाषिणा। सश्रीकञ्च हरिं पूज्य रुद्रं वा उमया सह" इत्यादि। गरुड़पु॰ "फाल्गुनादितृतीयायां लवणं यस्तु वर्जयेत्। समान्ते शयनं दद्यात् ग्टहं सोपस्करान्वितम्"। समान्ते वत्सरान्ते "संपूज्य विप्रमिथुनं भवानी प्रीयतामिति। गौरीलोकप्रदं नित्यं सौभाग्यव्रतमुच्यते"।

सौभाग्यव्रतं भविष्यपु॰ "पौर्णमास्यां तु यः सोमं पूजयेद्भक्तिमान्नरः। सौभाग्यञ्च भवेत्तस्य इति मे निश्चिता मतिः। मूलमन्त्राः स्वसंज्ञाभिरङ्गमन्त्राश्च कीर्त्तिताः" इत्यादि।

सौभाग्यशयनव्रतं मत्स्यपु॰ "तथैवान्यत् प्रवक्ष्यामि सर्वकामफलप्रदम्। सौभाग्यशयनं नाम यत् पुराणविदो विदुः"। इत्युपक्रमे "वसन्तमासमासाद्य तृतीयायां जनप्रियाम्। शुक्लपक्षस्य पूर्वाह्णे तिलैः स्नानं समाचरेत्। तस्मिन्नहनि सा देवी किल विश्वात्मना सती। पाणिग्रहणकैः मन्त्रैरुद्वूढा वरवर्णिनी। तया सहैव देवेशं तृतीयायां समर्चयेत्" इत्यादि। "एवं संवत्सरं यावत् तृतीयायां सदा मनो!। प्राशने दानमन्त्रे च विशेषोऽयं निबोध मे। गोशृङ्गोदकमाद्यं स्यात् वैशाखे गोमयं पुनः। ज्यैष्ठे मन्दारकुसुमं बिल्वपत्रं शुचौ स्मृतम्। श्रावणे दधि सम्प्राश्य नभस्ये च कुशोदकम्। क्षीरमाश्वयुजे मासि कार्त्तिके पृषदाज्यकम्"। पृषदाज्यं दधिमिश्रं घृतम् "मार्गशीर्षे तु गोमूत्रं पौषे सम्प्राशयेद्घृतम्। माघे कृष्णतिलांस्तद्वत् पञ्चगव्यञ्च फाल्गुने। ललिता विजया भद्रा भवानी कुमुदा शिवा। वासुदेवी तथा गौरी मङ्गला कमला सती। उमा च दानकाले तु प्रीयतामिति कीर्त्तयेत्। मल्लिकाऽशोककमलकदम्बोत्पलमालतीम्। कुब्जकं करवीरञ्च बाणमम्लानकुङ्कुमम्। सिन्दुवारञ्च सर्वेषु मासेषु क्रमतः स्मृतम्" इत्यादि।

सौभाग्यसङ्क्रान्तिव्रत स्कान्दपु॰ "अथान्यां प्रवक्ष्यामि सौ-